# द्वितीयः पाठः

*नीतिकथासाहित्ये हितोपदेशः अन्यतमः ग्रन्थः। एवं हि श्रूयते — नारायण शर्मा नामा पण्डितः पाटलिपुत्राधिपतेः सुतान् नीतिशास्त्रं बोधयितुमिमं ग्रन्थं रचयामास। स्व-मनोज्ञ-प्रवाहमय-शैल्याः अयं ग्रन्थः लोकेषु अतिप्रसिद्धिम् अवाप। सरस-सरल-भाषया अस्मिन् ग्रन्थे पञ्चतन्त्रादिग्रन्थानाधारीकृत्य पशुकथानां संग्रहोऽस्ति। हितोपदेशस्य चत्वारः परिच्छेदाः उपलभ्यन्ते- १. मित्रलाभः २. सुहृद्भेदः ३. विग्रहः ४. सन्धिश्च।*

*प्रस्तुतोऽयं पाठः 'मित्रलाभ' परिच्छेदस्य प्रथम-कथायाः सम्पादितोंऽशो विद्यते। अस्मिन् पाठे गुरूणाम् अवज्ञायाः एकीभूयकृतप्रयासस्य च फलं वर्णितम् अस्ति। चित्रग्रीवस्य अवज्ञां कृत्वा कपोताः जालबद्धाः सञ्जाताः। पुनश्च चित्रग्रीवस्य उपदेशेन एकचित्तीभूय संहतिमाश्रित्य जालमादाय एव उड्डिताः। एषः एव पाठस्य उपदेशः — 'संघे शक्तिः' इति वा 'संहतिः कार्यसाधिका' इति वा।*

## संघे शक्तिः

अस्ति गोदावरी तीरे विशालः शाल्मलीतरुः। नानादिग्देशादागत्य रात्रौ पक्षिणो तत्र निवसन्ति। अथ कदाचिद् अवसन्नायां रात्रौ अस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनक नामा वायसः प्रबुद्धः, कृतान्तमिव द्वितीयम् आयान्तं व्याधम् अपश्यत्। तम् अवलोक्य अचिन्तयत्–''अद्य प्रातरेव अनिष्टदर्शनं जातम्, न जाने किम् अनभिमतं दर्शयिष्यति।'' अतः तदनुसरणक्रमेण व्याकुलश्चलितः।

अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम्। स च प्रच्छन्नो भूत्वा स्थितः। तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पन् तान् तण्डुलकणान् अवलोकयामास (अपश्यत्)। ततः कपोतराजः तण्डुलकणलुब्धान् कपोतान् प्रति आह (अकथयत्) ''कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः ? तन्निरूप्यतां तावत्। भद्रमिदं न पश्यामि। सर्वथा अविचारितं कर्म न कर्त्तव्यम्''। एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पम् आह (अकथयत्) —

**ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनो नित्यशंकितः।**
**परभाग्योपजीवी च षडेते दुःख-भागिनः।।**

तत् श्रुत्वा कपोतराजस्य शङ्कां च अनादृत्य सर्वे कपोतास्तत्रोपविष्टाः। अनन्तरं सर्वे जालेन बद्धाः बभूवुः। ततो यस्य वचनात् तत्र अवलम्बितास्तं सर्वे तिरस्कुर्वन्ति। तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच– ''नायमस्य दोषः। विपत्काले विस्मय एव कापुरुषलक्षणम्। तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम्।

इदानीमप्येवं क्रियताम्। सर्वैरेकचित्तीभूय जालमादायोड्डीयताम्।'' इति विचिन्त्य सर्वे पक्षिणः जालमादायोत्पतिताः। अनन्तरं स व्याधः सुदूराज्जालापहारकान् तान् अवलोक्य पश्चाद् धावनम् अकरोत्। ततस्तेषु चक्षुर्विषयातिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः। अत एव उच्यते–

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।**
**तृणैः गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः।।**

## शब्दार्थाः

**नानादिग्देशाद्** — विविध-क्षेत्रेभ्यः (विविध दिशाओं और देशों से)। **पक्षिणः** — खगाः (पक्षियों का समूह)। **अवसन्नायाम्** — समाप्तौ (समाप्त होने पर)। **अस्ताचलचूडावलम्बिनि** — अस्ताचल-शिखरं गच्छति (अस्ताचल के शिखर पर अवलम्बित)। **प्रबुद्धः** — जागरितः (जग गया)। **कृतान्तम् इव** — यमम् इव (यमराज के समान)। **द्वितीयम्** — अपरम् (दूसरा)। **आयान्तम्** — आगच्छन्तम् (आते हुए को)। **व्याधम्** — लुब्धकम् (शिकारी को)। **अवलोक्य** — दृष्ट्वा (देखकर)। **अनिष्टदर्शनम्** — पापदर्शनम् (पापदर्शन, अपशकुन)। **अनभिमतम्** — अनिष्टम् (अनिष्ट)। **व्याकुलः** — व्यग्रः (व्याकुल)। **विकीर्य** — प्रक्षिप्य (बिखेर कर)। **विस्तीर्णम्** — प्रसारितम् (फैला दी)। **प्रच्छन्नःभूत्वा** — (छिपकर)। **वियति** — आकाशे (आसमान में)। **विसर्पन्** — उड्डयन् (उड़ते हुए)। **सपरिवारः** — परिवारेण सहितः (परिवार सहित)। **तण्डुलकणलुब्धान्** — तण्डुलकणान् प्रति लोभयुक्तान् (चावल के टुकड़ों के प्रति लोभयुक्त मन वाले)। **निर्जने** — जनहीने (जन रहित)। **निरूप्यताम्** — निश्चयं कुर्वन्तु (निश्चय कीजिये)। **भद्रम्** — कल्याणम् (कल्याण)। **सदर्पम्** — गर्वपूर्वकम् (अहंकार युक्त)। **ईर्ष्यी** — ईर्ष्यावान् (ईर्ष्या रखने वाला)। **घृणी** — घृणावान् (घृणा करने वाला)। **असंतुष्टः** — असंतोषी (संतोषहीन)। **नित्यशंकितः** — नित्यसंदेहयुक्तः (सदा शंकालु)। **परभाग्योपजीविनः** — पराश्रिताः (दूसरों के भाग्य पर जीवित रहने वाले)। **अवलम्बिताः** - जालबद्धाः (जाल में बंध गये)। **तिरस्कुर्वन्ति** — अपमानं कुर्वन्ति (अपमान करने लगे)। **विपत्काले** — विपत्तौ (विपत्ति में)। **अवलम्ब्य** — अवधार्य/धृत्वा (अवलम्बन लेकर/धारण करके)। **प्रतीकारः** — निवारणोपायः, समाधानम् (समाधान)। **एकचित्तीभूय** — सम्मिल्य (एक मन वाले होकर/मिलकर)। **आदाय** — नीत्वा/गृहीत्वा (लेकर)। **संहतिः** — उद्देश्यपूर्णसमूहः (उद्देश्य से युक्त समूह/संगठन)। **आपन्नैः** — प्राप्तैः (प्राप्त हुए)। **मत्तदन्तिनः** — मत्तहस्तिनः (मदमस्त हाथी)।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठप्रश्नाः**

१. वायसः कीदृशं व्याधम् आयान्तम् अपश्यत् —

(अ) कृतान्तमिव द्वितीयम्  (आ) मितभाषिणम्
(इ) अनिष्टदर्शनम्  (ई) अनभिमतम्  ( )

२. कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः इति कः उक्तवान् —

(अ) लघुपतनकः (आ) चित्रग्रीवः

(इ) व्याधः (ई) हिरण्यकः ( )

३. विपत्काले कापुरुषस्य लक्षणमस्ति —

(अ) विस्मयः (आ) धैर्यम्

(इ) उत्साहः (ई) प्रतीकारः ( )

४. अल्पानामपि वस्तूनां कार्यसाधिका अस्ति —

(अ) संहतिः (आ) उपयोगः

(इ) अभावः (ई) समभावः ( )

**अतिलघूत्तरात्मक-प्रश्नाः**

१. वायसस्य नाम किम्?

२. वायसः कम् आयान्तम् अपश्यत्?

३. कः कपोतराजः?

४. कीदृशैः तृणैः मत्तदन्तिनः बध्यन्ते?

**निबन्धात्मक-प्रश्नाः**

१. कथायां वर्णितं व्याधकृत्यं स्वशब्देषु लिखत।

२. चित्रग्रीवः कपोतान् किम् अवबोधयत्?

३. कपोताः कथं सिद्धिं प्राप्तवन्तः?

४. चित्रग्रीवं अवहेलयन् कपोतः सदर्पं किम् उक्तवान्?

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्नाः**

१. (अ) २. (आ) ३. (अ) ४. (अ)

**लघूत्तरात्मक-प्रश्नाः**

१. लघुपतनकः २. व्याधम् ३. चित्रग्रीवः ४. गुणत्वमापन्नैः।

**व्याकरणप्रश्नाः**

१. अधोलिखितेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत-

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| निवसन्ति | वस् | लट् | प्रथमः | बहुवचनम् |
| अपश्यत् | .......... | .......... | .......... | ........... |
| दर्शयिष्यति | .......... | .......... | .......... | ........... |
| पश्यामि | .......... | .......... | .......... | ........... |

| | | | | |
|---|---|---|---|---|
| बभूवुः | .......... | .......... | .......... | ........... |
| उवाच | .......... | .......... | .......... | ........... |
| अकरोत् | .......... | .......... | .......... | ........... |

२. अधो-लिखितेषु पदेषु शब्द-विभक्ति-वचनानां निर्देशं कुरुत —

| **पदम्** | **शब्दः** | **विभक्तिः** | **वचनम्** |
|---|---|---|---|
| तीरे | तीर | सप्तमी | एकवचनम् |
| पक्षिणः | .......... | .......... | .............. |
| चन्द्रमसि | .......... | .......... | .............. |
| तस्मिन् | .......... | .......... | .............. |
| व्याधेन | .......... | .......... | .............. |
| वने | .......... | .......... | .............. |
| सर्वे | .......... | .......... | .............. |

३. निम्नलिखितेषु शब्देषु सन्धि-नामनिर्देशसहितं सन्धि-विच्छेदं प्रदर्शयत —

| **पदम्** | **सन्धि-विच्छेदः** | **सन्धिनाम** |
|---|---|---|
| कुतोऽत्र | .................... | .................. |
| व्याकुलश्चलितः | .................... | .................. |
| अप्येवम् | .................... | .................. |
| प्रतीकारश्चिन्त्यताम् | .................... | .................. |
| सर्वैरेकचित्तीभूय | .................... | .................. |
| सुदूराज्जालापहारकान् | .................... | .................. |

४. अधस्तनेषु पदेषु नामनिर्देशसहितम् समासविग्रहो विधेयः —

| | **पदम्** | **समासविग्रहः** | **समासनाम** |
|---|---|---|---|
| उदा. | गोदावरीतीरे | गोदावर्य्याः तीरे | षष्ठीतत्पुरुषः |
| | अनिष्टदर्शनम् | .................... | .................. |
| | अनभिमतम् | .................... | .................. |
| | सपरिवारः | .................... | .................. |
| | निर्जनम् | .................... | .................. |
| | मत्तदन्तिनः | .................... | .................. |
| | अविचारितम् | .................... | .................. |

५. निम्नलिखितेषु शब्देषु प्रकृतिः प्रत्ययश्च विवेच्यताम् —

| | **पदम्** | **प्रकृतिः** | + | **प्रत्ययः** |
|---|---|---|---|---|
| उदा. | प्रबुद्धः | प्र बुध् | + | क्त |

| | |
|---|---|
| जातम् | .............................. |
| विकीर्य | .............................. |
| प्रच्छन्नः | .............................. |
| ईर्ष्यी | .............................. |
| घृणी | ............................. |

६. निम्नलिखितपदानां प्रयोगं स्ववाक्येषु कुरुत–

| | **पदम्** | **वाक्यम्** |
|---|---|---|
| उदा. | रात्रौ | बालकाः रात्रौ पठन्ति। |
| | वायसः | .......................... |
| | चित्रग्रीवः | .......................... |
| | व्याधः | .......................... |
| | असन्तुष्टः | .......................... |
| | प्रतीकारः | .......................... |
| | पक्षिणः | .......................... |

७. सम्यक् विभक्तिं संयोज्य कोष्ठकगतेन पदेन रिक्तस्थानं पूरयत —

उदा. शाल्मलीतरौ **पक्षिणः** निवसन्ति स्म। (पक्षी)

(अ) अवसन्नायां ........... वायसः प्रबुद्धः। (रात्रिः)

(आ) तेन .......... जालं विस्तीर्णम्। (व्याधः)

(इ) कपोतराजः तण्डुलकणलुब्धान् .......... अकथयत्। (कपोतः)

(ई) ........... कपोताः तत्रोपविष्टाः। (सर्व)

(उ) अल्पानामपि .......... संहतिः कार्यसाधिका। (वस्तु)

(ऊ) सः व्याधः जालापहारकान् ........ अवलोक्य पश्चाद्–धावनम् अकरोत्। (तद् )